श्लोकोत्तरार्द्धेन कुंडलीस्वरूपकथनं प्रश्लोति॥ तत्रैतां कुंडलिनीरहस्यं देशिककटाक्षाद्दृते ज्ञातुमशक्यत्वा
त्॥ परमाद्भुतां ज्ञानात्मकत्वान्नादात्मकत्वाच्च॥ मूलाधारेत्यादिभिः साधकस्तत्त्वैः पङ्क्तिः श्लोकैः कुंडलिनी

सा॰२ के॰१

श्री मनोरमा॰ स्वरूपं तदनुभावं चोपदिशति॥ तत्र नेत्रेन॥ ज्ञानाकारेण॥ मां कुंडलीमहाद्युतिः॥ विश्वप्रकाशत्वात्॥ मायाशीर्षे
विसर्जनीयशीर्षे॥ तां मायां उच्चारन्तीं॥ तदा लता ऊर्ध्वं संचरन्ती॥ स्वर्गइत्येतत्॥ उत्तरत्र सुषुम्नामध्यदेशे ऊ
त्यस्य विशेषणं॥ कुंडलिनी॥ तदाश्रित्यासन्नेतः॥ एवं उक्तरूपानुविशेषे अज्ञुर्नं याति॥ मूलाधारादिनिर्ग
त्य तदुपरि श्रोत्रादीन्द्रियग्रामिनी॥ स्वेच्छादंडहतो॥ स्वेच्छाप्रेरणापरवशा॥ अन्यदा॥ तस्यां प्रसुप्तभुजगाकार
रा मा॥ तया प्रसुप्तं स्थितायां॥ निशांधकारे भुवनस्थितिवत्॥ अप्रकाशतया॥ एतदुक्तं भवति॥ यदा स्फुरद्रूपि ॥३१३॥
॥३१३॥ णी बुद्ध्यात्मिका कुंडलिनी शक्तिर्मूलाधारात्॥ प्रसुप्तभुजगाकारतां विहाय स्वेच्छाप्रेरिता ऊर्ध्वं गता सती सा
खिलदेहान्तरादिन्द्रियद्वारा विनिर्गत्य विश्वं कवलीकरोति॥ तदा विश्वप्रतीतिर्भवति॥ पुनश्च स्वेच्छया य व्या॰ ४
दा मूलाधारे सा प्रसुप्तभुजगाकारमात्रस्वरूपतां याति॥ तदा निशांधकारे भुवनस्थितिवत् विश्वप्रतीति
र्नस्यादिति॥ एवंप्रकाशकारीतां कुंडलिनी॥ देशिकादेशदर्शितां॥ देशिकोपदेशदर्शितां॥ मामपि॥ शिवे

313

कालेन तत्सिद्धिमाह तद्दर्शनादिरहितस्य प्रत्यवायं चोपदिशति। तत्र इतरः। प्रोक्तज्ञानरहितः। देव्याः सर्वका
रणभूता या ललिता याः॥

शक्तिवरवां च जीवन्मुक्त इत्यादिभिः साधक इत्यन्तैरष्टाविंशतिभिः श्लोकैः जीवन्मुक्तलक्षणमुपदिशति॥ तत्र
अप्रयुक्तमानसः। इति पदच्छेदः। शोकहर्षावितिः भूमिगः। शोकहर्षयोरपि पर्यङ्गतः। [illegible] निरुपाधिकसंतुष्टः
स्वभावसंतोषयुक्तः। स्वेच्छाधीनेच्छया युतः॥ अपरक्षेरितबुद्धिः। समारिमित्रः। रागद्वेषाभावाज्जीवन्मु
क्तः। जीवन्नेव मुक्तः परमार्थतः स्वात्मनोऽन्याघनावादित्यर्थः॥ इतर इत्यादिना यो निष्ठित्यनेनार्धघनेन
श्लोकेनोक्तज्ञानरहितस्यापि देव्यर्चनात् कालेन तत्तदुपासनादिगौरवलाघववशात्॥ कालज्ञेत्यवि
लम्बनेन इतरः तत्तत्का[illegible]र्यादिरहितः॥ जन्मनिर्वृतिभिः॥ अपरमार्थज्ञानसर्वः स्वैर्हि विघ्नजन्मभिः॥ अवि मूर्खः
वेकी विघ्नैनोद्भवैरित्येतदुत्तरत्र मदेरितस्य विशेषणं॥ उन्मत्तपित्तः कर्तव्याकर्तव्यज्ञानरहितः॥ अयो
ग्यातियोनिषु॥ नीचैर्नीचैर्विजयेषु परवशो भवतीत्यर्थः॥ नित्या स्थित्यादिभिरर्चित इत्यन्तैः रष्टाद्यैः हिंसि

श्रीमतोरमा॰

॥१

श्लोके॰ नित्यामुक्ते दौर्लभ्यं तद्भक्तिवैभवं नित्यावैभवं विग्रहाविर्भावे तेन स्वरेण तदुपास्तिं चोपदिशति। तत्राप्रदक्षिणे
सकृत्कृतदण्डादिभिः पापकर्माणि॥ अज्ञानवासनाद्युपहतकर्माणि यद्बलाद्भक्तिबलात्॥ प्रागुक्तलक्ष
राम॥ णः जीवन्मुक्तलक्षणः॥ न च प्रागुक्तलक्षणो भवेदित्यन्वयः॥ तां भक्तिं अस्मिन्पटले वक्ष्यमाणरूपां दे
॥३१४॥ वता इत्यस्यान्वयं इत्यनेनान्वयः॥ लोकपालाद्या इत्यत्राद्यशब्दस्त्रयस्त्रिंशत्कोटिदेवतादिविषयः॥ तद्भ ॥३१४॥
क्तिप्राप्तसंपदः उक्तरूपभक्तिप्राप्तैश्वर्याः॥ बहुनानाघृणेन सह॥ अन्वेद्वं इति च पदच्छेदः॥ भावया
मीत्यस्य तात्येव इत्यनेन पूर्वत्रान्वयः अहो शिवां त्रिकाले संध्यात्रये। विग्रहान्वितः न्यासविग्रहः॥ अनेनल
घुशानानामपि संध्यात्रयोपास्ते रवश्य कर्तव्यता कथितेति संप्रदायार्थः॥ तर्हीत्यादिना श्लोकोक्तरा
ई न पंचविंशपटलप्रोक्तमातृकोद्धरणव्याप्तचक्रस्थाः॥ वीत्यादिना श्लोके त्रिमूर्तीनामसन्यदेवतानाश्च

314

चकारस्य ग्रहणादिदर्शी ततस्थिति रूपं च स्मारणीति तत्र न । न।

श्री मेरुपथा २ तत्र ४ साध्य ३ षोडशनित्याविग्रहाः २

नित्यानां सेछाविग्रहात्मकमुपदिशति ॥ तत्र ॥ विधिविष्णुशिवात्म त्वं ब्रह्मविष्णुरुद्रात्मकत्वं तासां षोडश
नित्यानां निजेछया ॥ अन्या ४ अन्यत्र तत्रैषूपदिष्टाः ॥ तन्मयविग्रहा ४ पररूपमित्यादिना महानित्यत्वेनाप्युद्दि
ष्टा केन पररूपहोमकथनश्लाघ्यपुरश्चरंसिद्ध साधकादि येषु सिद्धानामेवतत् परहोमयोग्यतामितरे
षामनुत्रयेषां तदयोग्यतां चोपदिशति ॥ तुर्यशेषो महदद्भुतं समस्तभेदविजयं नामकत्वात्तौ पररूपहोमेना
वसिद्धिः ॥ सिद्धरूपाणां गुरुणां ॥ अस्मिन्नेवपटले प्रोक्तसूक्ष्महोमसिद्धानां ॥ अन्येषां साधकसाध्यानां ना
वशा ॥ एतत्परहोमस्येतिशेषः ॥ तथासिद्धवत ॥ प्र दीपेत्यादिना श्लोकोत्तरार्द्धेन तत्परहोमत्त्वा वसिद्धाना
मानुत्तावं हृदीकृत्य नित्यासु नत्रुपलब्धिकारणरूपदिशति ॥ तत्र प्र दीपेण शोषयापानां देशिकाकटाक्षा
दिभिर्दूरीकृतदुर्वासनानां ॥ ततज्ञासे विनां ॥ विदितपरमार्थनाथ सेवादितत्पराणां ॥ नित्येत्यादि नि ४ तद

पत्रिका धि ४

श्री नमो रमा॰ त्यत्रैः षड्त्रिंशल्लोकैस्तत्वसमावपुरस्सरं नित्यानन्दोल्लासोपदेशं प्रोक्तनिगमनं च करोति॥ तत्र नित्याविद्यास्तु॥
षोडशनित्या नाम विद्यास्तु सुंदरीति देवी संबुद्धिः॥ आमुष्मिका संशयत्वं॥ परमार्थपरिज्ञानात्॥ संतोषः
अवान्यविषये छायघ्नावात्॥ नित्यप्रसन्नता॥ देशकालाद्यनवच्छिन्नभावेन॥ सुखिता॥ स्वात्मपरमानन्दानु
राम॥ भवरसेन॥ त्यागिता॥ नैरपेक्ष्यात्॥ ज्ञानेसदानुसंधानं॥ कृतज्ञत्वं॥ गुरुचरणनलिनयुगल [illegible] नज्ञ ॥३१५॥
॥३१५॥ नपरत्वं॥ [illegible] अलुब्धता॥ इतरानपेक्षा॥ अकार्पण्यं॥ [illegible]लुब्धविषयमुद्दिश्य महाप्रयत्नराहित्यं॥
अदीनत्वं॥ अलुब्धभावः॥ परस्विन्नानितुघमः भेदराहित्यात्॥ दयालुता॥ सर्वप्राणिषु मनःखिन्नी॥ उदारता
315 वशः अवैषम्यं मनस्थितौ॥ लाभहान्योः॥ लाभहान्योः सर्वमनस्थितावैषम्यमिति चान्वयः॥ कल्याणशीलता॥ मंगलाचरण
स्वभावता॥ कल्याणानि निवेशित्वं॥ मंगलकर्मस्वतिनिवेशित्वं॥ कल्याणकीर्तनं॥ मंगलस्वभावानाम् महतीमनुभावकी
७२

दैन्यं। अकल्याणकथालापवैमुख्यं। अकल्याणेषु कर्म्मसु तदाचारवतां कथालापेषु वैमुख्यं। स्वेच्छयास्थि
तिः। अपरमाधीनतयास्थितिः। सदैश्वर्यं। राजचोरदुर्जना[illegible]रात्याद्यनुपहतमहिमतात्मकं। स्तोकत्वं। सौ
लुंठाकिमत्वं। नैष्ठिकत्वं। सर्व्वदेवतादिविग्रहेष्वनुस्यूतनित्यात्मतावा[illegible]निचारित्वं। अजिह्मता। अकुटि
लहृदयता। सखीनुकूल्यं। सुरनरतिर्यगादिष्वभेदेन सर्वविग्रहाणां नित्यानिग्रहात्मकत्वप्रतिपत्तेः। संगी
तप्रियत्वं। नादस्वरूपस्य नित्यात्मकत्वात्। वांछितमाप्राय्यः। स्वस्मात् छिन्नविषमात्मतावात्। राजयोषित्वं। श्रा १७५
न्तं। [illegible]वहुमानं। स्वस्यापि रामात्मकसिद्धेः॥ अमत्सरः। स्वसमानाधिकराहित्यात्। सर्व्वोत्तर
त्ववांछा। देवतातादात्म्यसिद्धिवांछायां विकल्पेत्यादिनाश्लोकेन परहोमस्वरूपे स्थूलसूक्ष्महोमयोरपि
तन्मयत्वं चोपदिशति। तत्र। विकल्पस्वरूपं। सकलविश्वविकल्पकारणस्वरूपं। निर्विकल्पं। परस्वरूपं। वि
धानं। किलयत्नं। एतदुक्तं भवति॥ सकलविकल्पकारणत्वं तस्य मनसो निर्विकल्परूपे स्वात्मनि [illegible] वि

द्वि ४

श्रीमनोरमा॰ लापनं परहोम इति।यन्मया परहोममया।उच्चावचेत्यादिति:समीचित इत्यत्रैव प्रतुर्निप्तोके स्थूलसूक्ष्महो
मयो: परहोमेन तादात्म्यवासनां तद्नुसंधानं चोपदिशति।तत्र।उच्चावचविकल्पानां।समित्पुष्पफ
लादिभिर्दत्तिन्नानां वस्तूनां होम इत्येणांतन्मयत्वात्॥ अग्निमयत्वात्।ऐकरूप्यं अपृथग्भावः।एतदुक्तं भव
राम॥ ति।समिदादिभिर्सकलवस्तूनां स्थूलहोमादग्निमयत्वेनैकरूप्यमुदीरितमिति॥ तथा।एकीकुर्याद्विश्व
॥३१६॥ यमेण तदुक्तं भवति॥ सूक्ष्महोमात्र स्वमूलाधार[illegible]मध्यस्थकुंडलिनीमुखवह्निमहावह्नौ ॥३१६॥ द्वि ५
सकलशब्दोदयविश्रांतिपदे नानारूपं वाचकैश्च हैस्तद्वाच्यानर्थांश्च वेद्यवेदकविदात्मनैकीकुर्यादिति
316 स्थितिरित्यादि नाम्यार्धेन समर्थ्यते दृढविलापनात्।स्थितिरेव परहोमो भवतीति कथितं।उच्यते।स्वा
त्मरूपमहावह्निः।तत्र ज्वाला॥ इति छोस्वा।आत्मरूपमहाशक्तिरित्यर्थ:॥ सैव च येषां रूपाणि।ते।स्वात्म
रूपवह्निज्वालारूपिणः।तेषु।स्वात्मरूपमहावह्निज्वालारूपिषु॥ निरिंधनेकरूपेषु।अनन्याधिष्ठित

महा १ ज्वालारूपिषु। स्वात्मरूपापृथग्भूता महाशक्तिः स्वात्मरूपवह्निः २

मुपदिशति॥ तत्र चतुरस्रे उत्कृष्टरूपे। अस्त्रे। शोकरूपे। ३४

नास्त्र १ वृं

प्रकाशरूपे शुद्धपरमार्थात्मनि। सत्तामात्रात्मरूपे। स्थिरे। अविकारिणि नि[illegible]त्ये। महविलापात्तु निरवशेषविला
पनतावः। एतदुक्तं भवति। स्वात्मरूपमहाशक्तिच्छन्नरूपिण्ड निरधिष्ठानप्रकाशात्मके शुद्धसकलरूपे शुद्धपरमा
र्थतस्फुरिते तलरूपे अविकारिणि सत्तामात्रे स्वात्मनि तेषां निःशेषविलयनतावः परहोमः समीरितः इति।
तेषिमित्यादिनानूपतस्त्यनेन श्लोकद्वयेनोक्तं कुंडे शुद्धसामान्येन चतुरस्रकुंडे शुद्धतत्कर्म्महोमविधानं [illegible] त्रा शु-
कुंडे षित्तिशेषः शोकरूपता। शोकान्नूपविधानेन। प्रागित्यादिना कृत्स्नशरत्पन्नेन श्लोकद्वयेन मंगला
दिकर्म्मसु हेमे दिग्विशेषाभिमुख्यमुपदिशति। तत्र प्राग्वदक्षिशिवदिगुक्तः। प्रागभिमुखः उदगभिमुखः शि
वदिगभिमुखश्चतुर्दिग्विशेषो दक्षिणास्य दक्षिणादिङ्मुखः। दुर्दिग्विशेषो गा[illegible]गेदार्थ्यं पकर्मा वह्निमुखः। वह्नि
दिङ्मुखः। वायुमुखः वायुदिङ्मुखः। राक्षसोमुखः। निर्ऋतिदिङ्मुखः पश्चिमास्यः। पश्चिमदिङ्मुखः। अत्यानि
घोकेनराणि। एतदुक्तं भवति। होतुरभिमुख्यादिकं से देवितां तांदि[illegible]शम्। प्राची परिकल्प्य कुंडं निर्म्माय

६३

शोपनोरमा०
शुद्धयादिति॥ स्वदेशेत्यादिना श्लोकेन स्वदेशादौ प्रोक्तकर्म्मसु प्रोक्तदिङ्मुखतायाश्च वश्या कर्त्तव्यता
न दकरणे क्ष्यपवायं चोपदिशति। तत्र गेहादावित्यत्रादिशब्दः पुरादिविषयः प्रोक्तानि तद्दिशि चान्य
यादि परिवृत्तकरणे। कुंडादीत्यादिना शेषतत्स्थानेन श्लोकद्वयेन कुंडादिकरणासक्तानां स्थंडिले होम
राम॥ विधानं चतुरस्रस्थंडिलनिर्म्माणविधानमुक्तनिगमनसहितमुपदिशति। तत्र तु विशेषो लोमास्थि सु मो ४
॥३१७॥ लोष्ठादि निर्धि रहिते [illegible] भूमावंगुलेच। तत्रा प्रोक्तप्रकारेण कृतकोष्ठनवको मध्यः सर्वमध्यको ॥३१७॥
ष्ठमध्या [illegible] ॥ ॥ इति षोडशनित्यातंत्रेषु श्रीकादिमताख्यस्य परिपूर्णस्य तत्रसाम्प्रदायस्य सारसिंह
राजाभिधानेन सुत गानंदनाथेन विरचितायां मनोरमाख्यायां वासकदेवताचक्रतत्पूजादि सूक्ष्मपरहोम
विधाने प्रकाशनपरः स्रिशे पटले परिपूर्णाय मन्तष्टम॥ ॥ प्रथ्वीस्याश्चि शेपटले षोडशनित्यानां वासकदेवता
चक्रतत्पूजादिविधानसहितं सूक्ष्मपरहोमविधानमुपदिश्या तत्र षोडशनित्यानां ताकिनिष्ठानामसिद्ध
न कर्म होमादि विधानमुपादिशति॥ सूक्ष्मे भिरुपादि विधानलक्ष्येति श्लोकद्वयमवतरणेन त्रिंशेन पटलेन। तत्र सूक्ष्म
नित्यादिनानाचार नैरित्येन श्लोकद्वयेन प्रोक्तनिमित्त

317

श्री ४ ९२

नस... हिर्नं प्रोक्तकुंडेषु प्रोक्तविधानेनाभिमर्द्दनविधानकथनं प्रस्तौति। तत्र तेन तत्कथितं। अनन्तरसर्ग्वस्मिन्

पटले क्षयनिघनरोगनिग्रहोत्पातनमित्यत्र देषशद्वोमारणविषयश्चाभिग्रेशाद्यो युद्धादिषु पराजयादिवि

षयश्चोच्चाटनं उच्चाटनं। आयुर्द्दायमित्यादिनिराकतनप्रशमनमित्यत्रैश्चतुर्भिः श्लोकै रविचार... कर्म्मकाले कर १ ग ३

ज्ञातव्यांशं तदनवेक्षणेष्टत्य वायं चोपदिशतीति। तत्रालग्नोक्तं उद्युणेत तः। त्रयोदशे पटलेन "नेत्यादिना र द्धं ४

षडशीतिन मन्त्रा को ... ग्रहाणां ... येन प्रोक्तानसत्राणामानुयुणेत तः" दावि क ग्रहाणां। तत्प्रयोगकाले गो

चरस्यहाणां। चसमस्तु ... अष्टकवर्ज कं। फलमिति शेषः। त्रयाणां प्रोक्तानामायुर्द्दायदशाफलगोचरफ

लाष्टकवर्ज फलानां आनुयुणे। अनुकूल्ये। आभिचार्यस्य रिपोः प्रतिकूल्ये इत्यर्थः। अन्यथा कुर्याघादि।

९२ ... नाध्ये वाविकारोभिन्नक्रमः। तत्र यप्रातिकूल्यन एवेत्यर्थः। एतदुक्तं भवति॥ रिपो रविवारकाले ज्यो

तिःशास्त्र होरास्कन्धोपकारैस्तस्य तत्कालिक मायुर्द्दायगोचराष्टकवर्ग्गेषु ग्रहाणां स्थितिं विचार्य त

क्र १ ग २ त ५

ल्यै१ न्विदि ५ आचारं २

श्रीमनोरमा० च यात्तु क्रूरत्वभिचारकर्म न कुर्यात् । तमनवेक्ष्य क्रूरकर्माणि कुर्वाणं तान्येव नाशयंति । तत्रय प्रातिकू
ल्य एव तद्विघ्ननाशाय तमति क्रूरकर्माणि कुर्याद् इति ॥ तद्देवतानक्ति । रियो देवतानक्ति । आस्तिक्यं आस्ति
राम॥ क्यो देवब्राह्मणादिविषयः वर्त्तनं । अत्र लोक्य तत्तदैस्ले षामानुत्तावादिकमित्यर्थः ॥ अन्यथा । प्रोक्तान्यथा
॥३१८॥ करणे वा विकल्पो एतदुक्तं भवति रियोरभिचारप्रयोगादिषु तस्य देवतानक्तिमास्तिक्यमाचारं गुरुं तत्व
पारदमि व्रज्ञान(पि)द्रांव्यातेषामानुत्तावादिक तद्विद्भिरालोच्य तत्र प्राक्कल्पेतस्याभिचारादिकं न कुर्यात् तदन्य ॥३१८॥
318 था करणे तत्रफलस्यैव फल्यं तत्प्रयोक्तुर्न्नमिनं वा भवतीति ॥ रियोरित्यादिना श्लोकेत क्रूरप्रयोगारंभकाले
गृहादिषु तद्देशविशेषादिकं चोपदिशति ॥ तत्र अष्टमलग्ने तन्मदीराशेर्वा इलग्नराशेर्वेति शेषः । काले तदुद
यकाले अष्टमराशिगे स्थाने ॥ अनन्तरश्लोकद्वय वक्ष्यमाणराशिपात्मकेषु स्थानेषु द्वादशसु ॥ तद्विनाशापरिशु
विनाशाय ग्राद्यामित्यादिना स्थितमित्यन्ते तश्लोकद्वयेन मंडपगृहादि सकलवास्तूनां द्वादशापसात्मता

रा१

वा यो को ता ५ नेरता ५ तरस्यां दिशि १

मुपदिशति। तत्र वह्नेः। कोणे दक्षिणे। दिशो निर्ऋत्यां विदिशि। पश्चिमतः पश्चिम दिशि। ईशकोणे। सुस्थितां ता
कालचक्रस्य राशिचक्रवन्नत्र मतीत्यर्थः॥ एवमित्यादिना श्लोकेन [illegible] श्लोकनिगमने चक्रगतद्वादशराशीनी प्र
तिराश्युदयकालघटिकासंख्यां चोपदिशति। तत्र एवं। उक्तक्रमात्। राशिक्रमे। राशीनां स्थितिक्रमे कर्म
णि क्रूरा [illegible]: देशतः। देशात्मकत्वेन। [illegible] कालेतु। कालचक्रे तु॥ पंचपंचसु॥ एकैकराशेः क्र व ४
काल ५ मयोगतः अपक्रमचक्रस्थितिस्तु स्वदेशयोर्वैषम्या णि तश्चास्त्रोक्तक्रमयोगेन स्वस्वदेशे राशीनामुदय घटि
कामानवशात् [illegible] वक्ष्यमाणप्रकारेण सूर्याधिष्ठितराश्यादिक्रमयोगतः॥ चैत्रेत्यादिना श्लोकेन कालचक्रे
ग्रहाणां गतिक्रममुपदिशति। तत्र चैत्रादिषु। अत्र दिव्यत्वात् चैत्रादिशब्दः सौरमासविषयः॥ तुर्विशेषे। यति।
एकैकसौरमासस्यैकैकराशिभुक्तिक्रमेणेति शेषः॥ तथाऽमेषादिभिः अश्व्यादिभिः। ग्रहमंडले। ज्योतिः
शास्त्रेन तत्त्वहृदयपरिदृष्टिप्रोक्तकालविशेषैरित्यर्थः॥ देहस्थि त्यादिना श्लोकेन सकलप्राणिनां देहस्

नर वि २ दक्षे ५ तान्

श्रीमनोरमा० द्वादशराश्यात्मकत्वमुपदिशति। तत्र॥ तद्वन्मेषादिमीनान्तक्रमेण राशीनां द्वादशसु स्थानेषु त्रयाणामित्या
दिनाश्लोकैर्योनकाले ग्रहराशिवशेन शुभाशुभकारणीयत्वमुपदिशति। तत्र त्रयाणां। देशकालविग्रहात्म
कानाम्॥ ओं गुरुएयेनात्रानकल्पेना अन्यथा॥ ठक्काले घने नाएवैकृते कृतप्रकारैलेघनेना। शुभाशुभप्र
राम॥ योगो वक्तो। तथेत्यादिनाश्लोकेन पुत्तलीकेपार्थिदेहविषामृतस्थानयोर्ज्ञातव्यत्वमुपदिशति॥ तत्र तथेत्यस्या
॥३१९॥ र्थ तस्थानकानीत्यत्राद्वयः॥ षड्विंशपटलेषोक्तक्रमेण वामस्तागयोः प्रतिभागं पंचदशपैवदशानन्ते ॥३१९॥
दक्रमेण स्थितानीत्यर्थः॥ अहनि प्रयोगादिवसे॥ विषस्थानानि॥ अनन्तरश्लोकवक्ष्यमाणानि सर्वतः
कर्मसु॥ तथा। वक्ष्यमाणप्रकारेण॥ सिते इत्यादिनिर्वर्तत इत्यन्ते स्त्रीधिकैः स्त्रिभिःश्लोकैः पुरुषाणां
योषितां च विपरिवृत्तिक्रमस्थानमुपदिशति। तत्र॥ सितेइत्यादिनाश्लोकेन द्वादशस्थानानि सितेपु
क्षपक्षे स्तनगाले स्तनेचगलेचमूर्ध्नि शीर्षमूर्द्धमध्ये पुंमूर्ध्नि शीर्षमूर्ध्नी मध्ये तत्रमूर्ध्नि मध्ये शीर्षमूर्ध्न

घर

319

वामपादांगुष्ठे। दक्षितो। २

ध्यतः शंख मध्येषु मध्ये च कर्णौ इत्यादिना श्लोकेन स्थानाष्टकं। तत्रास कंठे। वामकंठे। जान्वित्यादिना श्लो
केन दशस्थानानि। तत्व श्रंक्षिपार्श्वशष्टेनांघ्रिपृष्ठदेश उच्यते। अंगुष्ठौ दक्षिणपादांगुष्ठे नव च।
श्रंगौ। अंघ्रिपृष्ठे संधौ। तदनंतर संधौ। जानुगुह्ये। जानोर्गुह्ये। इति उक्तप्रकारेण। सितेतरे कृष्णपक्षे वा
मादि। वामभागे प्रोक्त प्रोक्त हृदयस्थानादि। एतदुक्तं भवति। शुक्लपक्षप्रथमादिषु कृष्णपक्षदर्श
नान्तेषु त्रिंशत्तिथिषु पुंसां दक्षिणभागे हृदयस्थानादि मूर्द्धान्तेषु नवसु स्थानेषु दक्षिणपुनस्त्रिवामपा
र्श्वे मूर्द्धादिपादांगुष्ठांतं च दशसु स्थानेषु पुनर्दक्षिणपादांगुष्ठादिनान्यत्र षट्सु स्थानेषु च स्त्री-
य त्रिंशस्थानेषु च स्त्रीणां तत्र त्रिंथिषु तत्र स्थानेषु दक्षिणवामपार्श्वविनिमयक्रमेण च विषस्य प
रिवृत्तिर्भवतीति। विषनाशास्य मित्यादि निक्षिप्य इत्यन्ने स्वाधे स्विन्निश्लोकेः पुत्तलीप्रयोगेन देवकाले।

श्रीमनोरमा० तदंगं तस्माधनं तत्फलं च पुत्तलीकरणं कथनप्रस्तावादिसहितमुपदिशति। तत्र विषनाडीमप्रविशति न
क्षत्रेषु प्रतिनक्षत्रं विषाख्यैकघोक्तनाडीचतुष्टयकाले॥ विषस्थाने॥ अनन्तरपूर्वोक्तो पुत्तल्या इति शेषः॥ तु
र्विशेषो सेकोचकाख्येन॥ सेकोचक इति मत्स्यविशेषः॥ तीव्र[illegible]स्थिमयेन तद्देहं तन्तीव्रसेजा स्थिमयेन
राम॥ नावदूरादिसमुत्थेन॥ कंटकेरिति शेषः॥ वा॥ विकल्पे॥ तथा॥ वेधयेदित्यर्थः॥ यत्र॥ अंगे तद्विद्धं॥ कंटकादि जे२
॥३२०॥ विद्धं॥ तदंगं व्याधिना इत्येतदुत्तरत्र शत्रुदेहस्य विशेष्यं॥ कालात्॥ प्रयोगस्य मौखलाघवादि[illegible]ना ॥३२०॥
कालज्ञो तत्प्रविलीवनात्॥ ध्रुवं निश्चितम्॥ आर्त्तिना॥ तदंगव्याधियुपेतापति शेषः॥ पुत्तलीकरणं॥
पुत्तलीनिर्माणविधानम्॥ मेषम इत्यादिना श्लोकेन द्वादशराशीनामश्विन्यादि त्रि नक्षत्रोत्थव
द्वादश द्वादशांशकानां च क्रमेणाधिपतीनुपदिशति॥ तत्र॥ अंशकानां मेषादिराशीनां च पतयः

क्रमेण अंशकराशिपाः १

नक्षत्राणीत्यादिना श्लोकेन प्रतिनक्षत्रे चतुश्चतुरंशकक्रमेण संभूया ष्टोत्तरशतांशकानामष्टो
त्तरशतं पुत्तली विशेषे प्रस्तौतीति तत्र एतावत्यः अष्टोत्तरशतसंख्याः॥ प्रथमेत्यादि त्रिश्लोकैः॥ पु
त्तलीमानविशेषानुपदिशति॥ तत्र प्रथमेन नवकेन अश्विन्याद्याश्लेषान्तेषु नवसु नक्षत्रेषु
वर्त्तमानांशकेषु इतरग्रहांशकेषु सप्तचत्वारिंशत्पुत्तल्यः॥ चतुर्दशाङ्गुलिमानेन चतुर्दशांगुलिमाननिता
इत्यर्थः॥ द्वितीयेन नवकेन मघादिष्वपि ज्येष्ठान्तेषु नवसुनक्षत्रेषु अन्येषां चन्द्रार्करहितग्रहां
शकानां। अष्टाविंशत्सु त्रयोदश। पुत्तलीसंख्या इति शेषः॥ तृतीयेन नवकेन मूलादिरेवत्यन्तन
वनक्षत्रेषु "अन्येषां प्राग्वत् कुजादीनामंशकानां। त्रयोदशांगुलिमानानि। समीरितेषु एव
मित्यर्थः॥ एकविधः सर्वत्रेति शेषः॥ प्रोक्तसंख्याक्रमस्तथा प्रथमनवके प्रोक्तसंख्यमान
मेव द्वितीय तृतीयनवकयोरपीत्यर्थः॥ पुत्तलीत्यादि त्रिक्रियाख्यत्रैस्त्रिभिः श्लोकैः पुत्तलीनिर्म्मा

तृतीय १

मंगुली ४

त४

श्रीमनोर· गोडव्याएपुपविशति।तत्र।वङ्गिहस्तमृदौ·दक्षिनौ।विनामृड्ड·स्मलवणो।इमशानमृड्डसहि
तवलूणेसुंठीपिप्पलिकायुतो।सुंठीपिप्पल्पश्चूर्णैर्युतै।मरिचौ।मरिचचूर्णो।गृहच्चूम।गृहचू
मचूर्णोलसुनीरसोनरसं।एतानिगुर्णुघण्टद्रव्याणिसर्वपुत्रलीकासाधारणानि।साध्यदेहेवे:।
रामा। साध्यनक्षत्रप्रोक्तावृक्षै:पिष्टैरित्पिनाषचूर्णैरित्यस्यविशेषणं।सिक्थकै।मधुच्छिष्टै:वैरिदेह
३२१ जन्मादेरित्यत्रादिशब्दोनखपादपांस्वादिविषय।उपेतैरित्येतद्धातुव्यतिरिक्तेपुवङ्गिहस्त ३२१।
मृत्सहितेषुत्रिष्वन्वेति।पुत्रलीत्यादिनानरडुत्यंतेनश्लोकद्वयेनपुत्रलीदेर्घ्यमानविभागी
३२१ करणावृणांतद्‌वयमानान्युपदिशति।तत्रपुत्रलीदैर्घ्य मानौ।तत्रदैर्घ्यकक्रमेणप्रोक्त
पुत्रलीदेर्घ्या अंगुलमानैएकत।एकांशेन।त्रयात्।त्र्यंशत्रयेण।त्रयात्।ग्रीवन्।कटिप्रपद
योः।अर्द्धांशेन कटिद्वयमर्द्धांशेनप्रपदद्वयंचेत्यर्थः।सर्वत्रपुत्रलीप्रयोगे।प्रयोगा॥

त३ व३

प्रोक्तानां पाताले त्यादिशिखामुया दित्यन्तै स्त्रिभिः श्लोकैः क्रूरकर्मप्रयोगारंभकालादिसमुपदिशति। तत्र
पाताले त्यादिना श्लोकेन प्रतिदिशं घं क्रूरकालमुपदिशति। तत्र मृत्युजे। मृत्युयोगे। दिन जन्मत्यो। मे
खादिना। शिष्य नक्षत्रांशेषु तत्र डांशे [illegible] मां मांश केइतियावत्। चंडीशेत्यादिना श्लोकेन दशविध
क्रूरकालमुपदिशति। तत्र चंडीश चंडायुधके योगे काणके। कानि नक्षत्रे। का ननेइत्यर्थे नाडिनक्ष
त्रे किं पुनरित्यर्थः। ज्योतिःशास्त्रोक्तानि तद्वचनानि विलिख्यंते। तीवाद्यष्टपातालयोगः। मोलिनी
संस्थस्येल्लायाति पदोदयं। त [illegible] दानी [illegible] वाढ्ययोयोगः पाताले गहितः। धुनेविषयोगाः। चतुर्थी
सप्तमी वार्धके वाडे षष्ठ्यष्टमी तथा। इंद्रावन्नौ मावरुणे तुलया द्याद्यखयो वुधे। मंडवस्वयोजा। विष्णुप्रमर्मा
दयास्थितो। एकादशांसुत्तेइ शेषमन्येषु स्थितयो विषं। पंचद्विराकाशनवावषड्षष्ठा तिथिनिर्वेषी। क्र
शिवविद्याउयामैंद्र्शेताणान्नस्सूर्यवारतः। मृत्युयोगाः। वस्वर्गज्ञेनियमर्कोणिमैत्रविन्नामघोत्तराः॥

नेत्र। ५

श्रीमनो र विद्राणि ध्रुवनराधारा ४ अविष्ण्यवपदक्रमात् । चित्राश्वुत्तरफल्गुन्यो मैत्रस्वात्यैंद्रवैष्णवं । पौष्णतिः पूर्वादि
तिष्येरणाम्टत्यवो वेद्दौ दिवारगाः ४ नाद्योगेयागाः ४ । पित्रैंद्राग्नेवा मूलहर्वा नुणाजाप्यनैर्युता । सूर्यादिवा
राः ४ क्रमशो नाशयोगाः हुमिरिताः ४ दिनम्टत्यवः । वह्निसुहस्ते विशाषार्द्रवुध्नाहीयाप्यनैहतते । इंद्रद्वष्ट्रे
३२२ धुवचतुर्थसाः क्रमशोम्टत्यवोन्हिचेत् । क्रकचयोगाः तिथिस्यवारस्य पूर्वयत्नसंख्यया त्रयोदशा मिलने
कृते सति । स्मृतिस्तयोगाः क्रकचाभिधानको विवर्जनीयः शुभकर्मसु ध्रुवं । चंडीचंडीशचंडायुधाख्य ।। ३२२
सूर्याधिष्ण्यितनात् भुजंगपितृहस्त्याष्ट्रं सुभैष्णुतौ पौष्णवक्रमशो धिष्ण्यात् गण्यया भीतां शुना संयुते । न४
धिष्ण्ये तापतिथ्यपतत्पविते तथे चंडीशचंडायुधं ।। तस्मिन्नात्यहिते स्फुरत्तिर्निजहिते कार्यं न कार्यं तु धेथ
महाश्मूलांक्क त्रिकाद्याः सप्तकेतारा: पूर्वादिक्रमात् । मंगहादिसुरवंतत्र महाशूलं शोभनम् ।। का
णान्त नक्षत्राणि त्यजेदाजैकपादादे खिप्तवानानृपते धडघानवकाणानस्पुद्दोषच्छिवारतं विना । रक्त

स पू २ चे४ पु २ न२

स्थूणं घृत्वाश्च वक्तुरोराशीत्यजो द्विपानुरजस्फटाव। तेजिपत्रतद्भनदन्तं रक्तस्थूनमितिस्मृतम्। कंठक
स्थूणं त्वौमेनार्धेणसंयुक्ता हस्ताघावतिमूलगम्। मूलात्तावदिद्विगेदस्थूणाकाएस्कारवेड्मेक्रमात्।
घामाघ्यावतिघामूलकंटकावतिद्वद्वेतूतोवतिकंटकस्थूणसंज्ञं तत्रयमप्पदोषदं। पंचार्धेकोदोषाः॥
वस्ताकोदंडगोपालेसार्धेकेशसर्वसारवाण्क्षौवपंचघूमाघाजन्मेहतैर्युतोत्यजेत्। एतद्दूक्तेमनवति। रिपो
रायुर्दायागोवराष्टकवर्गेणाय हेप्रुप्रतिकूलेषुपातालयोगादिभिः। प्रोक्तादोषैर्दुष्ट दिवसेत दुष्टुरा
शो विषनाड्यांवाप्रारब्धंक्रूरकर्मसद्यः फलतीति। वासमुच्चये। एवमुक्तप्रकारेणैव श्येत्यादिभिः॥
समीरितैरित्यत्रैश्वनुर्तिः श्लोके वृश्च्यादिषुकर्मसुप्रद्युपुत्तलीप्रयोगक्रियामुपदिशति। तत्र
सम्यकुर्वयकर्मोत्तं प्रोक्तयोगतः प्रोक्तमानेन। रिपुदेहजरामादियोगतः॥ आसमुच्चये स्वा
सने। होतुरासनस्थाने हितुः पादविन्यासप्रदेशस्याघः स्थाने। पिण्डमन्ततुजाः पिण्डजाः मूर्द्धजाः॥

२ सर्वा

पादयोस्थाने २

श्रीमनो॰ मृद्वा। तनुजाः पुत्तलीः सर्वत्वाहोतुरासनादिस्थानत्रयेऽक्रमात्। अपि समुच्चये एवं प्रोक्तप्रकारेण
साधारणं वश्यादिषु प्रोक्तकर्म्मस्विति शेषः। एतदुक्तं भवति। प्रोक्तमानाद्यलंबनेन तत्साधारणं
व्याप्यकरिपुदेहजरामादि तिस्रः हपिष्टमयीं सिक्थमयीं वै वंतिस्र॰ साध्यनक्षत्रवृक्षदेशेणैका प्रोक्त
३२३ डव्याप्य काले यितां वसंत्त्र्यवतस्रः पुत्तलीः कृत्वा नासुक्रमात्। पिष्टमयीं होतुरासनस्याधस्था
नेमृण्मयीं होतुः पादविन्यासप्रदेशस्याधस्थानेतत्तुमयीं कुंड[illegible]मध्यस्थाने नानेमयस्यावस्था ३२३
३२३ ने च स्थापयित्वा सिक्थमपि कुंडादुपरि तोरणात्तिर्यग्विष्कंभदानुणपुर्द्धपादामवाक्शीर्षामंकुत्ते
लंवमननाम कार्पांडसूत्रेण वद्धैवं साधारणं कृत्वोक्तानि [illegible] वश्यादीनि कर्म्माणि
वक्ष्यमाणक्रमेण कुर्यादिति। सर्पतत्यादि ताश्लोकेन कूनकर्मसुसुचं वक्ष्य खोपदिशनि तत्र सर्प
शीर्षस्रुवा। सर्पशिरः कल्पितस्रुवा। अशुभकर्म्मसु। विद्वेषोच्चाटनमारणादिषु वैरिपान्यस्र

ॠ३

यो ३

ग्रः॥ वैरिनक्षत्रप्रोक्तयोनिनुचिरेण। तथाइत्यस्यसर्पशीर्षेषुवाइत्येतद्विशेण्यैत्रिकोणेत्यादिनिर्नूत्नत
इत्यनैश्चतुर्भिः श्लोकैः४ अभिचारकर्म्मणिकुंडं होतुरभिमुखीकरणीयादिशंतदेशविशेषंहोतुर्न्नै
पेणरक्षाविधानंतदकरणेप्रत्युः प्रत्यवायंराघ्रसंघिदैशतकर्म्मणःतत्करणीयत्वंतदकरणेरा
ष्ट्रस्यप्रत्यवायंचोपदिशति। तत्रयमदिङ्मुखःदक्षिणदिङ्मुखः४ तत्रअभिचारभूमौ आत्मसिद्धये।
प्रयोक्तुः प्राणादिसिद्धयेअरातिनृपतिः४ शत्रूराजाअमुंप्रयोक्तारंकुर्वीतअभिचारमितिशेषः४ तइदानीं
अभिचारप्रयोगस्थानंराज्यंशन[illegible]वैः कालक्रमेणअक्षद्रुमेत्यादिनाश्लोकेनश[illegible]तुन्मादकरणे
[illegible]दुमादिया[illegible]शत्रुविनाशनहोममुपदिशतिश्रे
क्षद्रुमोऽक्षवकाष्ठसमिधे। तत्फलैःअक्षफलैः [illegible]तथाहैमीदललनाष्णुतैः४ उन्मत्तेत्यादिनाश्लोश्लो
केनशत्रोरुन्मादकरणहोममुपदिशति॥ तत्रतद्वीजकैः तत्पत्राष्णुतैः४ उन्मत्तपत्रोत्थरस

हैमीदलरसाक्तैः २ अक्षद्रुमसमिद्भ्यो ३
उन्मत्त । जे २
वीजः १

नक्षे त्यादिना श्लोकेन रिपुमारणा होमप्रयोगमुपदिशति। तत्र नक्षमालसमिद्धैर्नो करञ्ज कूष्माण्डैर्चीत कै॥
तक्फलैः। करञ्ज फलैः। तपी॰४ हेमा दललज्ज(?)लाक्षुतैः। १

श्रीमनोर॰ स्रुतैः॥ ॐ [illegible] नोथ्यरसप्लुतैः॥ [illegible] भेत्यादिना श्लोकेन रिपुमारण प्रयोगमुपदिशति। तत्र नक्षी
डकैः॥ तत्पत्रास्तु स्रुतैः॥ ॐ मत्ता नोथ्यरसप्लुतैः॥ आनगवधेत्यादिना श्लोकेन रिपुमारण प्रयो
३२५ गमुपदिशति। तत्र नत्स मिद्भिः॥ आरग्व धमसमिद्भिः तत्फलैः॥ आरग्वधफलैः॥ वितस्ति मात्रैः द्वादशी
गुलमात्रैः॥ अंतुष्करेत्यादि श्लोकेन रिपोश्चीव्रज्वरेणामारणप्रयोगमुपदिशति। अंतुष्करसमि तन्त्रा॰४
राम॥ ३२४ द्भैः अंतुष्करकाष्ठसमिद्भैः तद्बीजैः॥ अंतुष्कर वीजैः॥ तद्भूता स्रुतैः॥ अंतुष्करतैला स्रुतैः॥ सौवीरेत्या ३२४
दिना श्लोकेनारातेः॥ कलहान्मरणप्रयोगमुपदिशति तत्र सर्षपाज्य स्रुतैः॥ सर्षपवीजोत्पन्न
तैला स्रुतैः॥ शुंठीमागधीमरिचैः त्रिकटुकेन वैरिजन्मर्क्षवृक्षा मो वैरिजन्म [illegible] नक्षत्रा
वृक्षकाष्ठसमिद्भैः तन्मतिः शत्रोर्मतिः। प्रागुक्तैत्यादिना विनाशयेदित्यन्तेन श्लोकद्वये
न पुत्तल्या होम विधानेन शत्रुविनाशन प्रयोगमुपदिशति। तत्र प्रागुक्तै [illegible] नित्यन्तद्वैरि
तत्र सौवीरान्नैः। कांजिकाप्लुतैः॥ सर्षपेत्यादिना श्लोकेन रिपोर्दशन्मारणप्रयोगमुपदिशति॥ ४
२ २
६

गेधरकू

त: ।रक्तचयग्रन्कौपुत्व रक्तासन सुकु: । अनुष्टु विनः २ थ्रू

त्यस्य विशेषणं। उक्तविधानतः प्रोक्तमानादितः सर्षपातुरघृतसंसिक्तैः सर्षपातुष्करयोः तैलाक्त्यांसं
सिक्तैः निशि मध्यरात्रद्युत्यर्थः प्राग्विछित्वा नवमपटले चत्वारिंशके चत्वारिंशः श्लोकद्वयेन प्रोक्तोऽप्रका
राण्द्वादश शर्वं छित्वा तद्दोः छिन्नैः क्रूरयित्नः शत्रुप्रीतीति शेषः। अनुगो वरः कापायवस्त्रधरः। रक्त
स्रगादिपुष्पाद्युपयुः॥ अनुष्ठरेत्यादिना श्लोकेन वैरिणो दारुणं रप्राप्तिप्रयोगमुपदिशति। तत्रानल
भ्रारुक्रूरवजैः ५ वीजैः सर्पशीर्षकैः सर्पशिरः कात्यितस्तुषकाग्निः वेत्यादिनिद्धुवमित्यत्रैवत्पर्द्वैःसिन्निश्लोके
ष्ट्रमकुञ्जनिपातादिव्याजेन रिपुप्रयोगामुपदिशति। तत्र। तद्वक्तासीच्छ्रुतैः वैरिनकचपानुद्भवरक्ता
स्रुतैः। तत्र नूद्भूतसमिधो ऽपि। अपिवेत्यर्थः। निर्घातेनच्छ्रनिघातेन सलिलेनिमज्जनेन
पावके। पतनेम। [illegible] अत्यैः। अपस्मारायैः। वाविकल्पो निवपत्रैरित्यादिनर्द्वद्वयेन विद्वेष
णप्रयोगममुपदिशति। तत्र। चस्समुच्चये। तद्भुः निंबजैः वीजैरितिशेषः। पत्रैः फलैश्चेतिशेषः।

विनाशः४ करंजजैः ११

ता॰

श्रीमनो॰र॰ सर्षपस्नेहसिक्तैः सर्षपोद्भवतैलाभ्युक्तैः नीवेत्यादिनैंडितइत्यन्तेनार्द्धाधेनश्लोकेनोच्चाट
नप्रयोगमुपदिशति। तत्र नीचयोगे। नीचसंज्ञपातालयोगे। हुनेत्। जुहुयादिति यावत्। तद्द
क्षपिंडैः रिपुनक्षत्रवृक्षपिंडैः। दिनैः प्रोक्तैः। मंडलादिति। मृत्युपात्रेत्यादिना श्लोके
न। शत्रुवाहनदग्धिर्नीरोगो द्विनाशनप्रयोगमुपदिशति। तत्र मृत्युपत्रैः। विषवृक्षपत्रैः।
राम॥ ३२५ तत्काण्डैः विषवृक्षसमिद्भिः। नवबीजैः विषवृक्षबीजैः। विष्णु गो विषवृक्षकाष्ठैः ज्वालिन ३२५
वह्नौ। हुनेत्। जुहुयात्। हयाः गारिकैरित्यादिनि द्विदारणैरित्यन्तैः त्रीण्यागोनारोगाद
त्रिवैरिनिघ्नप्रयोगहोममुपदिशति। तत्र। अष्टमराशिके। अष्टमराश्युदयसमये। कंटका
येरित्यत्रादिशब्दोऽस्थिसूच्यादि विष्णुयः। शनैः क्रमशः। विषस्थाने नदीन विषयुतेगे। यमकं
टके। यमकंटसंज्ञेकाले। [illegible]। अर्द्धप्रहरके अर्द्धप्रहारसंज्ञेकाले यमकंटकार्द्धसं

वाहः४ त्रिभिश्लोकैः ४ प्रहर॰

ज्ञयोकालविशेषयोः॥ स्वरूपंदर्शयतिः॥ शास्त्रोक्तमार्गेणलिख्यते। सदोगवातस्योर्द्धवासास्त्रयम।
केटकानुवासरेभेदरेगीतार्थयामाग्रु वारक्रमान्तजेदिति। शीर्षे पुत्तल्याइतिशेषः॥ वाविकल्पे
तत्तदंगेः॥ प्रहृतशीर्षेणत्र। प्रहरादिनाइत्यादि॥ शब्दछेदनांविषयः॥ वा विकल्पे। तत्रद्वत्रेत्या
दिना [illegible] प्रमालयं त्यन्तेनाघ्यर्द्धेनश्लोकेनदाहज्वरेणरिपुमारणप्रयोगमु
पदिशति। तत्रस्थापितेरकोस्थापितप्राणे। गर्द्दभीमेइसलिलेगर्द्दभीमूत्रे। घ्रानैः केश्विद्दिवसैः।
मघूच्छिष्टेत्यादिनार्द्धद्वयेनोन्माद कारणरिपुमारणविधानमुपदिशति। तत्रनो। पुत्तलीं। निशि
मघाराते। तांपुत्तलीं। तिनतापनेन। तामित्यादिनार्द्धद्वयेनपुत्तलीखननप्रयोगं मारण
विधानमुपदिशति। तत्र। तां। पुत्तलीं। तत्तकेटकविद्धांगां। प्रोक्तकेटकादिष्वन्यतमेनविद्धां
गांपित्नृगेहेश्मशानेनिशिमघारात्रेसंचमाहारो। प्रागुक्तैरि त्यादिनायमामित्यन्तेनार्द्धद्वये

स्र न३

श्रीमनो॰ नश्लोकद्वयेन निपातद्वारेण रिपुमारणहोमविधानमुपदिशति तत्र प्रागुक्ते॰। अस्मिन्पटले
सप्तविंशादिश्लोकान्यामितिशेषः॰। तद्वत्सैः पुत्तलीविधानप्रोक्तद्रव्यैः॰। अशेषैः॰। द्वादशभि॰ २१२
तथाप्रोक्तमानेन तां शत्रुनक्षत्रवृक्षनिर्मितां पुत्तलीं अरतिमहीरुहैः अ॰। तिंदात्रवृक्षका
राम॥ ष्ठैः तत्र समिद्भिः॰। रिपुनक्षत्रवृक्षसमिद्भिः॰। निशिमध्यरात्रे। यातियमालयं रिपुरिति शे-
३२६ षः॰।। तथा विधेत्यादिना लक्षितमित्यन्तेन श्लोकद्वयेन पुत्तलीखननविशेषेण रिपुनि- ३२६
326 धनप्रयोगमुपदिशति। तत्र तथाविधौ। प्रोक्तमानादिभिः॰ प्रोक्तद्रव्यद्वादशनिर्मितां
प्रतिमां पुत्तलीं नवम्यंगानदिवसे नवमीसहिते गारकवारे वेदिकायतने अग्रपीठको अ-
ग्रपीठस्याधस्थाने। निशिमध्यरात्रे। नूताघैरित्यत्राघशब्दः प्रेतादिविषयः॰। निखाति-
वान्। अथ निखनेत्। अलक्षिते। एतत्क्रियाविशेषणं। सर्षपमित्यादि शिवेत्यन्ते पद्यश्लो-

मात गेहे ३ मि: १

नेः २

केस्त्वापज्वारेण रिपुनाशायपुत्तलीप्रयोगविशेषमुपदिशति। तत्रसर्षपमित्यादिपूर्वेनद्रव्य
चतुष्टये। साध्यस्य हृद्धस्तपथकलैः अपिसमुच्चये। क्वचेतिभिन्नक्रमं८। पुत्तलीकां क्वेत्वेत्यर्थः८।
ततः पित्राकृइव्यघ्ःकेन। तद्धृतौ। पुत्तलीवक्षः८ प्रदेशान्तः। निधायेतिभिन्नक्रमः८। अरिणा
मविघायेत्यर्थः। पत्रगांइत्यस्यारिनामइत्युतद्विशेषं। सजप्त्यस्यविद्या मित्यनेनान्वयः। तां
पुत्तलीं प्रतिष्ठितप्राणां। तान्नीयप्रतिलोमजामू। तान्नीयषंडस्यप्रतिलोमत्नेदान्मिकं सु
वतस्तु विघ्रास्यत्यतमां। साध्यस्यनक्षत्रस्यावघर्कोसत्रमनक्षत्रे८ निवध्यतीतीपुत्तलीं
निवध्येत्यर्थः८। तुर्थिविशेषे। नानुष्ठदाजतंतुना। मर्कटकोड्वतंतुना। जीवहस्तेन। प्र
वहन्नवामपुटपार्श्वहस्तेन। तां प्रतिलोमजांविमुंच। शुचौ। वन्हैतैः८। सर्षपादिनिर्द्रव्यैः८
सहस्रंसहस्रवारं। तुरवघारणे। तां पुत्तलीं दिने मयोगदिने। सः साध्यः। शिवइतिसिबुद्धिः८॥

साध्यस्या८ नेः १

श्रीमनोर० साध्यर्क्षेत्यादि निर्वृत्तवेदित्यन्तैश्चतुर्भिः श्लोकैः ज्वरोत्पादनप्रयोगं तत्र ज्ञानविधानादिकं चो-
पदिशति । तत्र अर्कदुग्धतः । अर्कक्षीरोत्पन्नदुग्धेन । वज्रीक्षीरेण वज्रीदलनोत्पन्नक्षीरेण ।
वस्त्रसमुच्चये । कर्पासतूरेण विषकैस्तदा तु णि प्राग्वत् अर्धांतं तु सूत्रेण । साध्यनामादिसंयुक्तौ प्रदेश । वक्ष२
लिखित साध्यकर्मणा संयुतौ कुंडाद्दूरं कुंडद्वयपरितः ससमिद्भिः साध्यनक्षत्रवृक्षसमुद्भूतसमि-
राम॥ द्भिः तु विशेषे । तत्क्षीराक्तौ अर्कवज्रीक्षीराभ्यक्तौ । निशान्तरा । मध्यरात्रे तु खद्यारणे । ततः । ३२७
॥३२७ तेन प्रयोगेण । तस्य वैरिणः । तां । प्रलंबितां पुत्तलीम् । नदाकोदरे । तटाकजलोदरे तेन खन-
३२७ नेन । अस्मात् प्रयोगात् । तस्य ज्वरार्त्तस्य । तथा प्रोक्तप्रकारेण । तथेत्यादिनोपसङ्गकैरित्यन्ते-
नाध्यक्षेन श्लोकेन तत्र तु पुत्तलीखननविशेषादिप्रमारणप्रयोगविशेषमुपदिशति । तत्र ।
तथा तो । साध्यनक्षत्रादिनिर्मितां पुत्तलीं डिकायतने । अग्निपीठघस्थाने इति शेषः ॥
इदो १ ने२

तद्योनिं साध्य नक्ष३योनिं तत्र पुरश्च वेडिकाग्रपीठे निहत्येत्यस्य तद्योनिमिति पूर्वेणान्वयः दत्त्वेत्यस्य
वलिमित्यनेनान्वयः तु विशिषे उपसर्जके स्वे स्वगृहेत्यादिना द्वयेन तत्पुत्तल्या हृदादिरो
मात्याप नप्रयोगविशेषमुपदिशति तत्र खाखापुत्तलीमिति विशेषः तदुपरि पुत्तलूपरि खावि
क्विप मित्यस्य काकोद्धिष्यायेनोत्तयत्रान्वयः पूर्ववच्चाग्निवर्द्धनादित्यनेनैव ज्वरादिगदसं
इत्यनेप न्नवेनव ॥ तामित्यादिना तत्पत इत्यन्तेन ह्रोद्वयेन श्लोकेन पुत्तली विशेषेन नाडुच्चाटन प्रयोगमु रव५
पदिशति तत्र तां साधयेद्दोहदां संभूतां पुत्तलीं तथा कृत तू पर्णीप्रोक्तमानादिनः तु विशेषेन तु जं उ४
घास्थिसंयुतां पूर्वसूत्रेणच केवलेनानुक्त सूत्रेण मन्त्रराजेरारितेति दक्षमे शान्तो तथा विघ्न
मित्यादिना तदेत्यन्तेन श्लोकद्वयेन विद्वेषण प्रयोगमुपदिशति तत्र तथा विधीत त्तत्रदत्तीति
म्रितमूठक्रमाजंतः तत्र देशकानुगुणामासेन विपिविवर्म्मनर्द्दविलालमूषिकचर्म्म त्यामु॥
व्याघ्रजंघास्थिसंयुतां२ ॐ निशि२ ओलम्बूर वी१ वेल२

पु॰

श्रीमनोरमा॰ परिणाहं। बाधकबाध्यात्मकयोः॥ क्रमादिति शेषः॥ साध्याख्ययायुतं। साध्यादिनामसंयुतम्॥ तत्र नि
धने दित्यस्य पुत्तली॰ युगमित्यनेन पूर्वत्रान्वयः॥ पितृगेहेस्मशाने। अथवा विकल्पे। मातृगेहे वं
डिकायतने नदीपूर्त्तर्पसम्यामिति शेषः॥ ताड्यादिनाभवति दित्यन्नेनार्धार्द्धेन श्लोकेन पुत्तलीघन
३२८ न विशेषात् कुलोत्सादनाप्रयोगमुपदिशति। तत्र॥ ना॥ पुत्तली॰ नव। नवसंख्याताः॥ प्रागवा ३२८
न खनः वद्धौ प्रोक्रमानतः॥ साध्यादीत्यत्रादिशब्दः कर्म्मविषयः॥ तद्धि धाजापसिद्धास्ताः॥ प्र
ति लोमात्मकनातीय विधानिमं त्रिताः॥ पुत्तली॰ नव कुलात्सानदम्। एवमित्यादिनाश्लो
कोत्तरार्द्धेन प्रोक्तानी निकटवर्त्ति विषय॰ प्रयोज्यत्वमुपदिशति। तत्र। एवंप्रोक्तपुत्तली
खननादिविधानेनाद्दूरेत्यादिना॰ र्द्धेनैश्लोकेन दूरस्थितवैरिनिधनप्रयोगकथनावेरि
प्रस्तावसहितं तत्सामर्थ्यमुपदिशति। तत्राव दामीत्यस्यप्रयोगमित्युत्तरत्रान्वयः। तेन वध्याशिइति

दूरस्थितानां विहराणामभिचारप्रयोगं देवी पृच्छति। तत्र कथं केन प्रकारेण। वदामीत्यादि
नार्द्धधेन २ शत्रुकुलोत्सादनं ४

नाश २

न४

सैवुद्धिः॥ येनप्रयोगेणनिकटस्थानु अरातेरितिशेषः॥ [illegible]ः तत्माद्येत्यादिनानाराज्ञागित्यत्नेर्नैघार्द्धेनश्लो
कद्वयेनदूरस्थारिप्रयोगहोममुपदिशति। तत्रातनूसाध्यक्षैः दूरस्थशत्रुनक्षत्रवृक्षैः। अष्टोशतं। अष्टो
त्तरशतम्। ताः। पुत्तलीः॥ प्रागुदीरिता [illegible] क्षीरद्वयसिक्ता। अर्कवज्रीक्षीराभ्यां सिक्ताः। ससंज्ञकाः॥ सा
ध्यनामकर्म्मसमेताः॥ त [illegible]शकमानापद्यताः॥ अशिवनैप्रथमंशादिरेवर्त्यांशां [illegible]माण्डान्तरस्थतां ता४
शाकप्रोक्तमानविनिर्म्मितदेहाः। ताः पुत्तलीः वैरिदिङ्मुखाः। शत्रुनिवासदेशदिङ्मुखाः। [illegible]
[illegible]पुत्तलीः। तत्रदेशककाले। तत्र पुत्तलीमानानुगुणं शंकाले। कथमित्यादिनां त्र्या
र्द्धेनवैरिणं निहंतुमुपायं देवीपृच्छति। तत्र कथं वा। केनप्रकारेण। मांत्रिकवली। प्रवलमांत्रिकाभिरक्षि
तः रिपुरितिशेषः॥ निहंतुंशक्यतेव्रजेव। वध्यतां व्रजेदित्यर्थः॥ तमित्यादिनापूर्वार्द्धेनतद्वैरिनिधनो
पायं कथनेप्रस्तौति। तत्र शिवइतिदेवीसंबुद्धिः। तस्याअरातेरित्यादिनार्द्धद्वयेनवैरिनिधनोपायमुपदिश[illegible]

य॰ वलतरमांत्रिकाभिरक्षितं ३

के४

तैः मंत्रिकैः २

पूर्वं १

श्रीमनोरमा तत्रा तेषु। अरातिरक्षाविधानतत्परैः। तस्य। अराते॰ स्वप्रयोगारंभकालादिति शेषः। कारयेत्। तदरातिप
र्श्ववर्त्तिनिमित्ति शेषः। तैर्द्विष्टैः। तस्मिन्। आगते। सुशको सुकरः। अनाश्रयात्। रक्षकाभावात्।
नाग्याधिकमावात्। नाग्याधिकमित्यादिना द्वितीयेन श्लोकेन। नाग्याधिक्यादिषु तस्य राज्ञा दिव
329 स्य निधनप्रयोगप्रकारं देवी पृच्छति। तत्र नाग्याधिकम्। प्राक्तायुर्द्दायादित्रिविधग्रहानुकूल्येन दैवो
पास्त्यादिर्नवाधिकं। कथं केन। प्रयोगतः। प्रयोगेन। देवेशो ति ईश्वरसंबुद्धिः। परः प्रोक्तप्रकारा उपायं
दिव्यत्वादुपायं वदामीत्यादिना [?] श्लोकेन पृष्टार्थकथनप्रस्तावपुरस्सरं नमर्थं स्तौति। तत्र।
आज्ञेइति संबुद्धिश्च परं। प्रोक्तप्रकारादिति शेषः। सिद्धेत्यादिना विधानतइत्यन्तेन श्लोकद्वयेन। 329
महामांसदिरक्तितशात्रोरतिवारप्रयोगमुक्त्वा निगमानो[?]पि तमुपदिशति। तत्र। सिद्धमंत्रात्।
हो तृरूपरिकल्प्य तिशेषश्च अतिस्थिना श पात्। परप्रयुक्तोपाधैस्तेषन्दद्यात्। तैः सिद्धमंत्रैः याम

त्रिकार दि।

द्विक्रमात्वं प्रतियामे द्विद्विपुत्रुष क्रमा शाततातेन प्रयोगेन। तन्निधनं। नारपार्थिका राजादेर्ति
निधाने। रक्षितस्यापि श्रेय्यामहाभंत्रिक्यादिभिरित्यर्थः श्रेयःयत्न इत्यस्य कुर्यादित्युत्तरेणान्वयः॥
एवं प्रकारेण॥ ॥इति षोडशनित्यातन्त्रे षु श्रीकादिमतारव्यस्य परिपूर्णस्य तंत्रस्य प्रपंचसारसिं
हर्जा ति धाने सुत्नगानन्दनाथेन विरचितायां मनोरमारव्यायां व्यारव्यायामरिमर्दन विधान
प्रकाशन परमेकत्रिंशं पटलं परिपूर्णं परामृष्टं॥ ॥ग्रंथसंरव्या। एकत्रिंशेनु पटलेनस्याधं त्रमुदी
रितम्॥ व्यारव्यानग्रंथसंरव्यानुसार्धं चतुःशतद्वये। पूर्वस्मिन्नेकत्रिंशे पटले शत्रुमर्द्दनहोमवि
धानादिकमुपदिश्यानन्तरं षोडशनित्या विद्यासिद्धानां सौम्यहोमविधानमुपशात्यर्थहोम
मित्युदीरिते रित्यं नश्लोकशतरूपेण द्वात्रिंशेन पटलेन। तत्र अथेत्यादिनान्तेदत इत्यन्तेनाद्य
र्द्धेन श्लोकेन पदनार्थकथनप्रकारस्तद्वैत्नकं च प्रस्तौति। तत्रेललितानिधायां शिवेवुतिदेवीसंबुद्धिः

घु २ श्री वि धया। १

श्रीमनोरमा॰ येनहोमेनहोमविधाने।प्राज्ञेड्इतिदेवीसेवुद्धिः॥इव्यकालादिभेदनइत्यत्रदिशब्दःकुंडादिविषयः॥
प्रोक्तेष्वित्यादिनार्द्धद्वयेनसामान्येनहोमविधानमुपदिशति।तत्रप्रोक्तेषुएकोनत्रिंशपट
लेवीदितेकुंडइतिशेषः॥उक्तमार्गेणएकोनत्रिंशत्पटलोक्तपरिलेखनपरिस्तरणादिवि
३३० धानेनशुक्लेत्यादिनिर्जीवितंतैःरुद्धाधैसप्तभिःश्लोकैःशुक्लप्रतिपदादिपूर्णान्ततिथि
ष्वैश्वर्यादिसिद्धिकरहोमंजलजपुष्पैर्देतुपदिशति।तत्रहुनेत्‌जुहुयादित्यर्थः॥मधुरत्र
यमेमिश्रैःक्षीरसर्पिर्मधुत्रिर्दविच्छन्नमधुत्रिर्वासंसिक्तैःशुक्तैः॥अमुकुलापतितात्म्लाना
330 शीर्णजंतुदूषितानांभ्रांतानंगास्पृष्टानुषितैः।नृपतिसंभित्तःसंपद्भिरितिशेषः॥तेषुशुक्लप्र
थमादितिथिरूपेषुअ[illegible]ः पद्मैःसितैःसितवर्णैस्तेषुप्रागवद्दिवसेषुअनुर्णैतुल्यलेशअरु ३३०
णकुमुदैः।तेषुदिनेषुप्राग्वान्।अर्चनादपीत्यनेनप्रोक्तपुष्पहोमप्रयोगेषुतत्रत्येषु॥

तृ ३ त १

तत्रतत्रार्चनमप्युच्यते। तैः षड्भिः ऋतुणा। सितपंकजद्वयकल्हारेन्दीवरकैरवद्वयैः। दिन होमतः शुक्लप्रथ
मादितिथिरूपदिवसेषु होमतः प्रोक्तषड्भिरिति शेषः। तद्दिनेषु शुक्लप्रथमादितिथिरूपदिवसेषु
यथाविधि। प्रोक्तपरिस्तरणपरिषेचनादिविधानेन। तैः प्राग्वद्भिः इंदुद्रवाक्तैः। कर्पूरद्रवाक्तैः। तुर्वि
शेषो। कृष्णेत्यादिना हुते इत्यन्तैरग्र्यैः [illegible] नवभिः श्लोकैः कृष्णपक्षप्रतिपदादिदर्शान्ततिथिरूपदिवसेषु
होमद्रव्यविशेषैर्लक्ष्मीप्राप्त्यादिसंपत्करहोमविधानमुपदिशति। तत्र सिते॥ शर्करामिश्रितयावह्नौ ते
षु कृष्णपंचदशतिथिरूपेषु हुते। जुहुयादिति यावत्। तद्दिने कृष्णतिथिपंचदशकरूपे दिने अकलुषा
शयः प्रसन्नहृदयः तद्दिने प्राग्वद्दिने। तथाशब्देन त्रिमधुराप्लावनमुच्यते। तद्दिवसेषु प्राग्वत्तु
विशेषे तद्दिने॥ प्राग्वत्। तैः नारिकेरफलद्रवोदैः। तद्दिनेषु प्राग्वत् कृष्णपक्षतिथिरूपेषु। सः मा
कः षड्भिः स्वतैः सितारक्त द्राक्षाखर्जूरीफलकदलीनारिकेरफलद्रवोदैः। तैः प्रोक्तैः षड्भिः सं

लपंच

सिनागव्यपयोक्तेः समानवर्णव[..]त्ससहिताया स्सितवर्णयागोः क्षीराक्तेः अ[..]पि[..] समुच्चये।
तेः प्रागवतषड्डिईवैतेः प्रागवत्। तथाते षड्डिड्वैश्च विक्षीरसेष्छुते रितिपदच्छेदः। नालिकेरफ
 लक्षोदेः क्षीराक्तेः नालिकेरफलक्षोदोत्त[..]न्नक्षीराक्तेः। अपिशब्देनेष्टमाप्नुयादित्ये
तदत्राप्याकृष्यतेतेः प्रागवत्सड्डिः। तथेत्यादिना क्षिता वित्यन्तेनार्द्धो घेन श्लोकेनसु
क्तपदप्रोक्त पुष्पषड्केन कृष्णपदप्रोक्त सितादिद्रव्यषट्केण एवं सं[..]भूयद्वादशातिड्
 वैः समस्तरूपेष्व नित्यहोमार्थ गोत्र मिहिरण्यवासः सिद्धिकरत्व मुपदिशति। तत्र तथा
द्वादशानिः शुक्लकृष्णपदयोः प्रोक्तैर्द्वादशानिः। वा विकल्पे। नित्यशः प्रतिदिनम्।
रवीत्यादि निर्मनोहरामित्यन्तैः सप्तभिः श्लोकैरर्कवारादिषु सप्तसु सप्तकरणहोमद्र
व्याण्युपदिशति।। तत्र सितान्तैः सितोपेतान्तैः [illegible] नुविशिष्टे। क्षीनाक्तैः। गव्या

तैरित्यादिनाश्लोकेन सप्तसुवासरे पृष्ठे
मात ३

युक्त क्षीरेषु चतुर्षु न्यतमान्नैः। तथा प्रोक्तविधानेन नाहृतान्नैः। प्रोक्तमध्यादिषु न्यतमद्युतान्नैः
वा विकल्पः। सितोपेतैः शर्करोपेतैः। तैरन्नैः स्वामिष्टैः तिलतंडुलैः तिलतंडुलमिश्रैः दुग्धसिक्त पन
सास्थिपरागैः। क्षीरसिक्तैः सितपनसबीजपरागैः सिप करत्वादिकमुपदिशति। तत्र तैः सम
स्तैः द्रव्यैरित्यर्थः। समस्तान्नैः समस्ताह्वनद्रव्यान्नैः सप्तसुवारेष्विति शेषः। तद्दिनैः एतद्दि
याम्यादिमंडलप्रोक्तदिनैः। विवाहवन्नैवाग्नु। ललिताविधावेकवाहोमः केवलवा। तत्रादित्यादिनाश्लो
पत्र८ केन तत्तत्संप्रयोगहोमदिवसेषु कर्तव्यमुपदिशति। तत्रतत्र दिनेषु तत्तद्विधानकार्येष्वेकद्वौ त्रीन्
वाद्यौ वेत्यर्थः। अश्विन्यादीत्यादिना क्रमादितपनेनाधश्चैतश्लोकद्वयेनाश्विन्यादिषु नवसु
नक्षत्रेषु क्रमात्संपतकरहोमद्रव्यनवकं तदाह्वनत्वसहितमुपदिशति। तत्र हुतेषु जुहुया
त् क्रमात्। एकैककमात्। शालीत्यादिना श्लोकोत्तरार्द्धेन द्रव्यपंचकं युक्त तत्र गौर तरे स्तिले
३२ तत्तत्प्रयोगदिनेषु। ४ ललिताविधानस्थाने ४
नवकर

नाक्षीमा ४ … धेनाद्धेतेन ५

श्रीमनोरमा ॥ सितवर्णतिलैः कृष्णवर्णतिलैश्च तथाविधेत्याद्यर्द्धेनडुव्यत्रितयं तत्फलं च । तत्र तथा विधैः
। सर्षपैः सित सर्षपैः कृष्णसर्षपैश्च वेद्यो द्वित्याद्युत्तरार्द्धेनाप्लावनडुव्यषट्कं । तत्र केतोदकश
ब्देन नालिकेरोदकमुच्यते । महिषीत्यादिनार्द्धेनाप्लावनडुव्य … डुवैश्चयंत क्रमेव । तत्र
३३२ महिष्यजाविकाक्षीरसंस्तुतैः महिष्यादीनां विकाक्षीरसंस्तुतैः तैः … डुव्ये प्रोक्तैः नवसुप्रोक्तो
षित्यादिषु क्रमात् । एकैकाभ्युतैकैकडुव्यक्रमात् । मघेत्यादिनाप्रयेइत्यन्तेनार्धमघादिनवन
332 क्षत्रेषु क्रमेण सेपकरहोमानुपदिशति । तत्र तथा जुहुयात् । नवभिः अनंतरवर्णमालौषव
कादिभिः । अपि समुच्चये । वणकैरित्यादिनाद्यर्द्धेनडुव्यचतुष्टयम् । शुद्धान्नैरित्याद्यर्द्धेनडु
व्यमेकं तदाप्लवनडुवी । तत्फलं च । तथेत्यादिनाध्रुवमित्यन्तेनार्द्धाधिकेन श्लोकद्वयेन मूला ३३२
दिनवनक्षत्रेषु सीपकरहोमद्रव्यनवकमुपदिशति । तथा एकैकक्रमात् । प्रोक्तविधानेनाष्ट

क्र १ व्य ५ माषान्नैरित्याद्यर्द्धेनडु व्यचतुष्टयं ३

तथा २

पं२ स्य३ दी २ श्रुतेः १

शुकैरित्याद्यर्द्धेनद्रव्यचतुष्टयं तदाज्यचनद्रव्यं च । तत्र पयः शुभ्रैः शालीत्यादिनोत्तरार्द्धेना सिष्टदिव
स्पेचकहोमद्रव्यापूपैश्चकस्य द्रव्यं पंचकम् । तत्र माषपिष्टतिलोद्भवैः ४ एवं पिष्टोद्भवैश्चएतानि
शाल्यादीन्युत्तरत्रापूपैरित्यविशेषणानि विजयादिफलमप्त्रकं मूलादिनक्षत्रनवकमोक्तहोम
साधारणम् ॥ सिद्धेत्यादित्रिस्रोरित्यन्तैश्चतुर्भिश्लोकैः सिद्धादिशुभयोगेषु संपत्करहोमविधा
नमुक्तहोमेहुतहोमकथनप्रस्तावसहितमुपदिशति । तत्र सिद्धयोगेषु तिथिवारादिसमायो
पु ४ गोत्पन्नेषु । यद्रव्यैः ४ अथवा [illegible] मलिमतुद्रव्यैः ४ तत्समृद्धिमाप्नो अमृतनाख्ययोगेषु । गुडूचीअमृत
लता । आदरानुमन्त्रितः ४ उभयोगे व्याधिषु न्पतमस्मिन्यूहे [illegible] तुष्वनागंमतेलग्नादशम स्थि
ते अनुणेनुत्पलैः ४ अनुणकैरवैः [illegible] युतै बष्कुहोपरहितैः उभः अधिकः ४ पर्वतारव्ये इत्य
स्ययोगे । इत्येतद्विशेष्यम् ॥ स्वातुष्वतगास्थिताब्कोदयराशौयदामेषतुलाकर्कमकरकेन्द्र

प्राग्वमुकुन्दा २   कृतद्रव्यासमृद्धिमाप्नो तत्र समुच्चयः । ४
नक्षत्रवारादिसमायोगोत्पन्नेषु ४

द२ म४ यत२

श्रीमनो.स्तो मान्। कुंडमुद्राखंडा स्थिता॥ मकरा। प्युंपगोवेतियावत्। हुनेत्। जुहुयात्। इत्यैः॥ अथामुमनि
तैः॥ तद्व्यपर्वतम्। संपूर्णम्॥ परमेश्वरीतिदेवीसंबुद्धिः॥ स्वदेवेत्यादिनात्कुलेइत्यन्तेन
श्लोकद्वयेनग्रहत्रिकरेहोमकालंतद्बंचोपदिशति। तत्रस्वदेवगोएकत्रिंशपटलेनोमे
333 त्यादिना श्लोकेन प्रोक्तस्वस्वराशिगते॥ अर्कादिषूच्यतेस्मिन्ग्रहेइतियोयः॥ स्वोच्चगोमेषवृ
षमकरकन्याकर्कटमीनतुलाराश्योरव्यादिसप्तग्रहाणांक्रमादुच्चराशयः॥ तेषुरव्यादिष्व
न्यतमोग्रहस्वस्वप्रोक्तोच्चराशौयदा स्थितः॥ तत्र कालेवाविकल्प। ग्रहत्रयेत्तत्रद्वहत्त्रये।
सितमिश्रैः॥ शर्करामिश्रैः॥ तुविशेषे। विषयाललितावितं। तत्रतेषु स्वस्वप्रोक्तोच्चराशि 333
षु स्थितायदाग्रहाः॥ तेषुतत्कुले। साधककुलेमासैत्या... निर्निश्चितमित्यन्तेश्चतुर्भिश्लोकैः
त्रिजन्मसुहोमडोनर्ध्यणपूजा विधानेनेष्वन्यतमस्यावश्यकर्तव्यतांतदकरणेप्रत्यवायंचोपदिशति।

प२ श्रि२ या३ प्रोक्तेषुकाले३ स्य२

तत्रमासेषुद्वादशस्वितिशेषः ॥ दूर्वांमृतातिलैः ॥ नेच्छन्त्यतमेनद्रव्येणेत्यर्थः ॥ नित्यंप्रतिजन्मत्रयम् । तद्दिनेषु ।
त्रिजन्मदिनेषु । विधांसहस्रंसहस्रवारंदिनानित्ययासहेतिशेषः ॥ तस्यजापितुः ॥ कुत्रचिद्लोकश्चिदित्यं होमश्च स्यर
संतवइत्येतद्विशेष्यम् । वंद्वासितैः ॥ वासमुच्चये । तद्दिनेजन्मत्रितये ॥ अवेघ्यजन्मत्रितयः होमोजपतर्प
णापूजनेभन्यतमेनेतिशेषः ॥ यदिस्याद्ध्यजन्मत्रितयोयदितस्यमांत्रिकस्यरोगादीत्यत्रादिशब्दाच्छूलादि
विघ्नः ॥ उच्चर्दीत्यादिनिरासयदात्वदित्यन्नेक्रितिश्लोकेः ॥ सूर्यदिपुखच्छेत्रस्वाध्यस्थेषु । पाश्रिकमं
तत्फलतदकारणप्रत्यवायंचोपदिशति । तत्रवाह्वयंसमुच्चयेविधौ । ललिताविधौ । सहस्रंसहस्रवारंवा
ह्वयम् । विकल्पेशतंशतवारं । [illegible] । शिवांप्रागवन्नित्योयः मांत्रिकातस्यरोगतः रोगो । तथाकुर्वन् ॥
प्रोक्तप्रकारतःजपंकुर्वन् । शोकहासास्पदम् । स्वपद्वयोः पलाशेत्यादिनाश्लोकेनवंध्यादिवत्प्रदहोमवि
धानमुपदिशति । तत्रफलैः पत्रैः कांडैश्चसमूलकैः ॥ पलाशोत्पन्नैरित्यर्थः ॥ कुंठवागपिमूकोपीत्यर्थः ॥

मनोरमा०

अर्केत्यादिनाश्लोकेनेष्ठाप्तिहोमविधानमुपदिशति। तत्र अर्कपुष्पैः। अर्कोद्भवपुष्पैः उण्डं त्रिमतं मंडलावृ। प्रागवदेकोनपंचाश दिनैः। तस्य अर्कवृक्षस्यमूलतः मूलैः खंडनूपैः विल्वेत्यादिनाश्लोकेनलक्ष्मीप्राप्तिकरहोमविधानमुपदिशति। तत्र फलैरित्यादिना तृतीयावहुवचनान्तगोत्रवुणम् पदानी विल्वप्रसूतैरित्यत्र विल्वशब्दे विल्वस्येतिषष्ठ्यंतनसंबंधः तथा त्रिमधुयुक्तैर्हुनेदायुकुर्यात्॥ या लक्ष्मीः। तदन्वयेगा साधकस्य वंश गामिनी॥ पद्माक्षैरित्यादिना श्लोकेन लक्ष्मीप्राप्तिकरहोमविधानमुपदिशति। तत्र पद्माक्षैः पद्मफलैः मस्थमणिभिः मधुरान्वयन्तैः त्रिमधुरान्तैः। तावद्भिनैः मंडल दिनैः। [illegible]केरित्यादिना दिना श्लोकेन [illegible]नाश्लोकेनलक्ष्मीपुत्रसिद्धिकरहोमविधानमुपदिशति। तत्र दिनावधि निरेवत्यादिनाश्लोकेनसप्तमालिन्याप्तूसः प्राप्तिकरहोममुपदिशति। तत्र तो [illegible] पकेः। एवाव धारणे लोमेमंगले। तुर्विशेषे। उच्चसंस्थितमकरा

३३४

मंडलदिनावधि। २

तैर २१ त ४

म

शिस्थि तेंवसरंमाहुरैत्यादिनाश्लोकेनगोशातप्राप्तिकरलक्ष्मीपुत्रभूमीनांप्राप्तिकरहोमद्वयविधा
नमुपदिशति। तत्र तेश्वमपृ... गोत्रपत्तराशिगतेतद्दिने: मंड लतरा। ...शतगुः। गवोशतयुक्त:
तद्वृ। मंडलात्प्रतिमक्षते: तेश्वंपकेरितिशेषः ४ लग्नेतद्दिव्यत्वात्मनेनेत्यर्थः ४ त्र्ययंगात्भूमिपुत्रवर्ग्गो
णांपाटलैरित्यादिनाश्लोकेनकन्यासिद्धिकरहोममुपदिशति। तत्रंगरात्र्यै। प्राग्रुक्तजलजपुष्पे ४
नंघावर्त्तपुष्पेघो कुटजै ... गिरिमल्लिकापुष्पे ॥ अपिसमुच्चये। तेरित्यादिनाश्लो
केनघन ...प्राप्तिकरहोममुपदिशति॥ तत्रतेः पाटलनगरं ...कुटजैः समाहारो। तद्दिने: मंडला। ता॥ श
तपत्रैरित्यादिनाश्लोकेनलक्ष्मीप्राप्तिकरहोमार्थं पुष्पपंचकमुपदिशति॥ तत्र केसरैः व कुलैः॥ विचकिलै मे
ल्लिकाविशेषै ...आदित्येरित्येतदाकृष्यते॥ मालि केत्यादित्तिसुनिष्ठितमितपन्ने...शिश्लोकेशूय्यमादि
पंचम्यन्ततिथिसंपत्करहोमनेदानुपदिशति॥ तत्रमल्लिकाघर्ड्नपुष्पपंचकं॥ तत्र नमेतुत्तिश्रुदर्णीपुष्पे:

माज ४

मु

रनोरमा०

दा३

समस्तैः तास्वेकैकस्यां तिथ्यां तत्पुष्पपंचकसमुदायैः॥ विशब्दो विकल्पार्थः॥ तैरेव प्रोक्तपंच विधपुष्पैर्वा॥ तथाए
कैकशः समस्तैश्चेतियावत्॥ भूषणो मस्ति शेषः दिनैर्भउदितैः प्रोक्तान्मंडलात्॥ एवं कालकोलविधिः प्रकरण
समानः कल्हारेत्यादिना तत्र मध्यत्पन्नेन श्लोकद्वयेन समामान्यतन्नादिपूर्णान्ततिथिपंचके प्रायूदकैकशः समस्तैश्च
राम॥ ॥३३५॥ संपत्कर होमविधानमुपदिशति॥ तत्र कमलकर्त्यैं रक्तकमलैः सितकमलैश्चप्रायत॥ श्रीद्राक्षैःनंदादिपू
र्णान्तं प्रतिपक्षस्यैकादशयादिपंचमीं शमीपंचदशंतंवा॥ विकल्पे॥ तथा कल्हाराद्यैः॥ पंचाप्तिः केतकीत्यादिना ३३५
नम श्लोकेनांचेविचित्रवासःसिद्धिकरहोमविधानमुपदिशति॥ तत्र तु विशेष॥ तद्दिनैः प्राग्वत्मंडलात्॥ लभते
साधक इति शेषः॥ अथ चयोनि वराद्यालोलैसितैरित्यादिना श्लोकेन सितवासोमुक्तादामरूप्यसिद्धिकरहोमवि
धानमुपदिशति॥ तत्रैर्यालभतेइतियावत्॥ हुनेत्यादिना जवांछितकरंलक्ष्मीसिद्धिक
रंच होमविधानमुपदिशति॥ तत्र हुनेतान्नुहुयात्॥ तथा सोडशभुनैरितियावत्॥ पत्रैःस्त्रमालस्य॥ यद्दणीनेत्या

त२ द५ दि२ श्लोके २

तत्र विधया ललितायाः प्रिये इति देवी संबुद्धिः। तद्भूतानि फुल्लप्रसूनवर्णानि॥ मरिचैरित्यादिभिः सितान्वितैरित्यन्तैश्च तुर्भिः श्लोकैर्वनिताकर्षणावशीकरणापु वश्य रूपवशीकरण राज्यलक्ष्मीसिद्धिकरसमस्तप्राणिवशीकरणहोमविधाना न्युपदिशति॥ तत्र॥१ द्वि

द्वीनाश्लोकेनानीलवर्णोवामस्त्रीकिकरहोमविधानमुपदिशति॥ निशासु॥ँ मध्यरात्रेषु इष्टं दयितां वनितां॥ न मेरुकुसुमैरित्यत्र कुसुमशब्दः प्रत्येकं समुच्चयेरित्यत्र वश्ययोगाः॥ तैः पाटल्यादिभिः षष्ठभिः (पुष्पैः) अपि शब्दः समुच्चये तैः अष्टभिः पुष्पैः॥ निशि॥ आर्द्धरात्रे तैः प्राप्यता॥ पुष्पैः॥ सितान्वितैः मार्करायुक्तैः॥ अन्नैरित्यादिभिर्द्वाभ्यां इत्यन्तैस्त्रिभिः श्लोकैः वनापुष्पसिद्धिकरहोमविधानं चोपदिशति॥ तत्र॥ नित्य हव नाद॥ प्रतिदिनं होमेनात यैवः घृताप्लुतैः॥ तिलतण्डुलैश्च तुर्विशेषा॥ तथा मध्यरात्रे॥ तथा प्राप्यता॥ आज्यैरित्यादिना श्लोकेन वला जपहोमस्य फलमुपदिशति॥ तत्र॥ तुर्विशेषा॥ द्विगुणैः मंडला॥ चसमुच्चये॥ स्त्रानतद इत्यादिभिः शक्राय इत्यन्तैः पञ्चभिः श्लोकैः साधकतत्कालकर्तव्यसहितम् लक्ष्मीप्राप्तिकाममहासिद्ध्यर्थहोममुपदिशति॥ तत्र वा समुच्चये॥ सितगोवत्सं गोवरः इत्यत्र सितशब्दश्च॥ प्रत्येकमन्वेति॥ देवीम्॥ ललितां॥ सितायाः सितवर्णायाः द्विगुणैः प्रस्थद्वयमात्रैस्तुर्विशेषैः सितमिति तिल तण्डुल विशेषणमुद्वा॥ विकल्पे॥ सितदुग्धघृतो

नवे ४ त्रितै स्वाद तै ५ तै ४

मह

पेतं॥ शर्कराद्युग्धघृतोपेतं॥ सिक्थकं दित्यस्य काकाक्षिन्यायेनोत्तरत्राप्यन्वयः॥ कृत्वेति पूर्वेणान्वयः॥ हीनेत्वन्न

श्रीमनोरमा स्वच॥ विधाय॥ ललितविधौ॥ श्रियं मे देहि देवी इति सप्ताक्षरी विद्या हुत्वा॥ ततः सिक्थकम्॥ तथा जुहुत्वा स

वत्स सितगोक्षीरपचितमन्नं सितदुग्धघृतसमेतं जुहुत्वा तद्दिनं हुतदिने॥ निरंतरम्॥ प्रतिदिवसम्॥ नि

राम॥ त्यशः॥ यावज्जीवम्॥ तदन्वयम्॥ साधककुलम्॥ रमा लक्ष्मीः॥ अद्भुताः अप्रमेयवैभवाः॥ पायसेरित्यादिना

॥३३६॥ श्लोकेन लक्ष्मीप्राप्तिकरं पूर्णा स्वर्कवारेषु च होममुपदिशति॥ पायसमिति शेषः॥ च समुच्चये॥ सवत्सेत्यादि ॥३३६॥

निर्ज्जितिनीत्यैनेर्ध्वर्द्धस्य मनिश्लोकेसीप न्याप्तिकं नवनीतसहितकल्हारादिपुष्पहोममुपदिशति॥ तत्र॥

नर तद्दिनात्रयम्॥ अनुष्ठितं॥ तुर्विशेषा॥ कल्हारप्रसूने दीर्घिकास्थविकशितकह्लारप्रसूनोदरे॥ तं दीर्घिकायाः॥ तम्

क्षिप्रवनेन ली तं कल्हारप्रसूनम्॥ उद्धृत्य॥ मौनेनेत्यर्थः॥ हुनेत्॥ जुहुयात्॥ अग्नौ संस्कृते इति शेषः॥ तदुद्गमकाले॥

मंगनाधिष्ठितराशेश्चतुर्थराश्युदयकाले तावद्दिनैः॥ मंडलान्ते॥ तथा व वलक्षरूपायाः॥ सवत्सायाः धवलवत्स

नवलिवे दयेत्५

वर्णायगोः॥ नवनीतम्॥ तद्दिनान्नमित्यर्थः॥ सितांबुने प्राग्वसितपक्षे॥ भृगोर्दिने॥ तत्रापि तदुच्चकाले॥
सप्तवारप्रयोगेनी॥ भृगुवारसप्तकप्रयोगेण॥ तथा उर्णासमुद्धृतं॥ सवत्साउर्णागोसमुद्धृतं नवनीतं तद्दिना
न्नमितिशेषः॥ ततः दीर्घिकायाः॥ उद्धृतेत्यर्थः॥ तुर्यविशेषे॥ ततुपश्चे॥ प्राग्वन्मौनेत्यर्थः॥ त्र्यष्टमितैर्वासरैः
रवेरितिशेषः॥ शिवइतिसंबुद्धिः॥ तथा गुरुवारेण नवनीताङ्कानि॥ नवनीतत्रिषितानि॥ उच्चेरवमध्य
स्योल्लमाद शमराशिस्थितेइत्यर्थः॥ उच्चगते॥ कर्कटकराशिगते॥ तदन्वयगामिनी॥ साधककुल
गामिनी॥ केवलमित्यादिनार्द्धद्वयेन केवलसितोपेतनवनीतफलं होममुपदिशति॥ तत्र केवलं पुष्प
रहितम्॥ सितोपेतेन॥ शर्करोपेतेन॥ कीर्तिलक्ष्मीघना रोगपविजयैः सहेतिशेषः॥ वंध्येकेरित्यादि
नामाभ्यासत इत्यन्तेनार्द्धद्वयेन श्लोकेन किंशुकव्रतपुष्पदध्यन्न होमफलमुपदिशति॥ तत्र व्रतैः सहका

दक्षिणमिश्रितान्तहोमेन १

रपुष्पैः॥ दध्यन्नहोमात॥ आर्द्रे इत्यादि विनिकृदीरितैरित्यन्तैस्सप्तभिश्लोकैर्निजवांछितसिद्धिकरंत
ल्लिखितपत्रहोमविधानं तद्विधातव्यं तन्नवनीतं वचोपदिशति॥ तत्र॥ निशि॥ अर्द्धरात्र इति यावत्॥
मंडलान्मासतो वा गान्त्॥ कार्पासोरवलाम्बवा उष्णपतः॥ तथा नवनीतसमेतं विलिख्य निज
वांछितमिति शेषः॥ वासमुच्चये निशि मध्यरात्रे॥ तु विशेषे॥ तैश्च नागवल्लीदलैः॥ प्रोक्तकाल तत्र ॥३३७॥
प्रागुक्तमंडलादितः॥ चंपकैः कृतैः॥ चंपकशृंखलैर्युतैः॥ चंपकपत्रैः॥ [illegible]ना॥ तद्दिनैः॥ प्र
स्वत्वा॥ तद्विधानतः॥ प्रोक्तहोमविधानतः॥ सितैः शर्करान्वितैः॥ स्वैघृतैः॥ स्ववांछितं॥ जुहुयात्॥
तत्पद्मपत्रैरिति शेषः॥ तस्य स्वाभिमतस्य॥ ॥ इति षोडशनित्यातंत्रेषु श्रीकादिमतारव्यस्य
परिपूर्णास्य तंत्रस्य श्रीवत्समारसिंहराजप्रकाशाभिधाने सुभगानन्दनाथेन विरचितायां मनो

रमभ्याख्यायां व्याख्यायां सौम्यहोमविधानप्रकाशनं पं द्वात्रिंशं पटलं परिपूर्णतां परामृष्टम्॥ ॥
ग्रंथसंख्या॥ द्वाविंशपटले प्रोक्ता व्याख्या ग्रंथाः शतात्परम्॥ एकाधिका सप्ततिस्कन्न[illegible]सु यंत्रा २
णि तत्र च॥ पूर्वस्मिन् द्वाविंशपटले षोडशनित्याविद्यासिद्धानां सौम्यहोमविधानमुपदिश्या
नंतरं तेषां वांछितप्राप्तिकनानिललितविद्यायास्त्वनुपभेदसमुत्थानि[illegible]ण्युपदिशत्यथ
षोडशनित्यां[illegible] इत्यंतश्लोकशतत्रूपेण त्रयस्त्रिंशेन पटलेन॥ तत्र॥ अथ षोडशनित्यादित्तिः क्र
मादित्यंतैः पंचत्रिंश्लोकैः पटलार्थकथनप्रस्तावपुरस्सरं तदर्थाननुदिशति॥ तत्र आद्यास
कलकारणभूताप्रधानेत्यर्थः॥ ललितासंज्ञयेति शेषः॥ उदितात्तृतीये पटले तस्याः ललि
तायाः॥ [illegible]भेदसंभवैः॥ तद्विद्याभेदसंभवैः॥ त[illegible]विद्यातात्रीयखंडभेदसमुत्थैः

श्रीमनोरमा ॥ [illegible] रूपैः षष्टिसमोपेतनवशत्याऽङ्कं भवति ॥ श्रीविद्यातन्त्री
